कथमेकं सदसद्रूपम् ? इति । अथाभेदः, ततः स...
रेकत्वम्, एकस्माद्धर्मिणोऽभिन्नत्वात्, तत्स्वरूपवद्;
कथमेकं सदसद्रूपम् ? इति । धर्मिणो वा भेदः...
रभिन्नत्वात्, तत्स्वात्मवत्; इत्थमपि कथमेकमुभयरूपम्
अथ भेदाभेदः, अत्रापि येनाकारेण भेदः तेन भेद एव?
चाभेदः तेनाभेद एव? तदेवमपि नैकमुभयरूपम्; अथ
कारेण भेदस्तेनैवाभेदः, येनैव चाभेदः तेनैव भेदः
एतदप्यचारु, विरोधात्; तथाहि—यदि येनाकारेण
कथं तेनैवाभेदः ? अथाभेदः, कथं भेदः ? इति । अथ
...प्याकारेण भेदः, तेनापि भेदश्चाभेदश्च, इत्युभयम् ?
चाभेदः, तेनाप्यभेदश्च भेदश्च, इत्युभयमेव ? अत्रापि
...रेण भेदः, तेन भेद एव; येन चाभेदः, तेनाभेद एव;
तदेवावर्तते ।

किं च, ...
इह धर्मधर्मिणोर्धर्मधर्मितया भेदः, स्वभावतः पुनरभेदः;
भावतोऽपि हि तयोर्भेदेऽङ्गीक्रियमाणे परस्परतः
पदार्थद्वयमेवाङ्गीकृतं स्यात्, न पुनरेकं द्विरूपम्;
तदत्रापि निरूप्यते,—न ह्यनादिनिस्वभावभेदयोर्धर्म
धर्मधर्मितयाऽपि भेदो युज्यते । तथाहि—यदि यो धर्म...

१. एकमिति न स्यात्, अभेदहेतुत्वात्तस्य । २. अभेदो हि द्वि...
वति । सत्त्वासत्त्वधर्मौ धर्मिणा सह भिन्नौ विद्येते ? आहोस्विद्धर्मी
सत्त्वधर्माभ्यां सह भिन्नो भवति ? इति विकल्पद्वयं निराकरोति,
धर्मिणो धर्मावभिन्नौ चेत् । ४. धर्मिणोरभेदे सति एकेन धर्मिणाऽ...
सत्त्वासत्त्वयोर्धर्मयोरेकत्वं स्यात् । ५. धर्मिस्वरूपवत् । ६. एकमे...
तद्, इति भावः । ७. वाशब्दः पक्षान्तरसूचकः । अथ वा
...णोरभेदे सति धर्मिणः पक्षस्यापि सत्त्वासत्त्वाभ्यां धर्माभ्यां द्वाभ्यां...
दात् । ८. धर्म° । ९. एकमिति न स्यात्, किं तूभयमेव स्या...
१०. धर्मधर्मिणोः । ११. भेदाभेदाङ्गीकारे तत्रापि पूर्वोक्तदोषानतिक्रम
१२. प्रकारमनन्तरया वा । १३ नियतस्वरूपतया । १४. वस्तु
१५. धर्मधर्मिरूपम् । १६. वस्तु । १७. धर्मधर्मिनियतरूपतया ।
वस्तुस्वरूपः ।

…वः, स एव धर्मिणोऽपि ? एवं सति असौ धर्मी धर्म एव स्यात्, …स्वभावत्वात्, धर्मस्वरूपवत्; धर्मो वा धर्मिस्वभावाव्यतिरि- …त्मातमूर्तिर्धर्मिमात्रमेव स्यादिति ? ततश्चैवं धर्मधर्मिणोः स्व- …वभेदाभावादनेकान्तिकभेदो कथं भेदनिमित्तं भवतः ? …ति । न च स्वभावतोऽपि तयोर्भेदाभेदकल्पना युक्ता, पूर्वो- …दोषानतिवृत्तेः ॥

भेदो वा स्यादभेदो वा द्वयं वा धर्मधर्मिणोः ।
भेदेनैकमनेकं स्या-दभेदेऽपि न युज्यते ॥ १ ॥
द्वयपक्षोऽपि चायुक्तो विकल्पानुपपत्तितः ।
तेनानेकान्तवादोऽय-मज्ञैः समुपकल्पितः ॥ २ ॥

किं च;—सर्वेषामेव विरुद्धधर्माध्यासितयः, न च सदस- …त्त्वं वस्तु संवेद्यते, उभयरूपस्य संवेदनस्याभावात्; तथाहि- …ताक्षजे विज्ञाने सदसत्त्वे प्रतिभासेते, असत्त्वस्याकोपितरूप- …त्वे वाऽसत्त्वविरोधात्, तथानुभवाभावाच्च ॥

न च कार्यद्वारेणापि सदसद्रूपं वस्तु प्रतिपत्तुं शक्यते … …नोभयरूपं कार्यमुपलभ्यते; न च तत्कार्यकरणे प्रवर्तमानं … …दाकारेण करोति, केनचित्र करोति, एकस्य … …त्; सर्वात्मना च करणे तद्वीजरूपमेव स्यात्; … …स्यचिदपि कारणं भवितुमर्हति, अभावैकान्तविरो… …

१. स्वरूपाभेदात् २ एकमनेकं न युज्यते, … …र्णाः । ४. अरूपानुपलक्षणमिदम् । ५. … …कार्यमत्र सजातीयम् । ७ इह मृत्पिण्ड … … …पगत । तत्र न कार्यद्वारेणावबोद्धुं शक्यं … … …हि समानजातीयं कारणेन सह … … …र्थ । न च कार्यं घटादि मृदः … … …न्य प्रत्यक्षत एवोपलम्भात्, … …
…१. वस्तु । ११. सदसद्…

च विभ्रमदरिद्रं स्यात्; ततं एव कटककुण्डलाद्युत्पत्तेः; न च
'तस्मान्निरुपाख्यतयाऽविशिष्टात् कस्यचिदेव भाव', न सर्वस्य'
इति वक्तुं युज्यते, हेत्वभावात्। अतः श्रद्धागम्यमेवेदं सद
सद्रूपं वस्तु, इति । तथा चोक्तम्—

न च प्रत्यक्षसंवेद्यं, कार्यतोऽपि न गम्यते ।
श्रद्धागम्यं यदि परं वस्त्वेकमुभयात्मकम् ॥ १ ॥

इति प्रथमपूर्वपक्षः ॥ १ ॥

एतेन नित्यानित्यमपि प्रत्युक्तमेवमवगन्तव्यम्, विरोधा
देव । तथाहि—अप्रच्युतानुत्पन्नस्थिरैकस्वभावं नित्यमाख्या
यते, प्रतिक्षणस्थितिधर्मकं चानित्यमिति । ततश्च यदि
नित्यम्, कथमनित्यम्? अनित्यं चेत्, कथं नित्यं? इति।
स्यादाशङ्का–'न हि कूटस्थनित्यतया नित्यं द्रव्यमभ्युपगम्य
तेऽस्माभिः, परिणामिनित्यताभ्युपगमात्; किं तु पूर्वोत्तरक्षणप्र
विभागेन प्रबन्धवृत्त्या । न ह्ययं पर्यायाणामिवोच्छेदः, तद्रू
पेण सर्वाप्रतीतेः । पर्याया एव हि पर्यायरूपेण निवर्तन्ते,

१. अभावादेव । २. अभावात् । ३. मृदादेरिव घटादेः । ४. मृदादेरिव घटादौ प्रतिनियतधर्मत्वभावेन । ५. एकत्रानेकविरुद्धधर्माध्यासयोगेन । ६. अप्रच्युतो निवृत्तिस्वभावतयाऽनुत्पन्नः सदाभावेन स्थिर, एकरूपतया एकः स्वभावो यस्य । क्षणस्थितिस्वभावमपि एकस्वभाव स्यात्, तद्व्यवच्छेदार्थं स्थिरग्रहणम् । स्थिरैकस्वभावमपि मुक्तवस्तु वैशेषिकैरभ्युपगम्यते, तद्व्यवच्छेदायानुत्पन्नेति । अनुत्पन्नस्थिरैकस्वभावमपि स्वध्वस्तुसमय भावत् वैशेषिकैरभ्युपगम्यते (घटप्रागभावादिः), तद्व्यवच्छेदायाप्रच्युतेति । ७. स्वभावेन । ८. एकरूपतया । ९. मीमांसक वैशेषिकैः [illegible] । १०. पूर्वोत्तरक्षणयोः प्राक्तनाग्रतनक्षणयोर्नारकमनुष्यपर्याययोः परस्परं वा प्रविभागोऽन्यत्वमेकत्वं, तेनोपलक्षिता या प्रबन्धवृत्तिः सं[तानेन] [illegible] तथा नित्यत्वमाख्यायते जैनैः । ११. [illegible] । १२. पूर्वोत्तरक्षणप्रविभागेन द्रव्यरूपेण । १३. उच्छेदेन । १४. [illegible]

न तु द्रव्यम्; इति नित्यमभ्युपगम्यते[1]॥

इयमप्ययुक्ता, यस्मात्, पर्यायेष्वपि नित्यता न संभवति, पर्यायव्यतिरिक्तस्य[2] द्रव्यस्यासिद्धेः; तथाहि—न पर्यायव्यतिरिक्तं द्रव्यमस्ति, तथानुभवाभावात्, व्यतिरिक्तभावे वा, अनेकरूपैकवस्तुवादहानिप्रसङ्गः। तथा चोक्तम्—

पर्याया भेदिनो नित्यं द्रव्यं स्यात्तत्स्वरूपवत्।
स्याद्वादविनिवृत्तिश्च नानात्वे संप्रसज्यते॥ १॥

व्यतिरिक्ताव्यतिरिक्तपक्षस्तु विरोधाघातत्वादनुद्घोष्य एव॥

इति द्वितीयपूर्वपक्षः ॥ २ ॥

एतेन सामान्यविशेषरूपमपि प्रतिक्षिप्तमवगन्तव्यम्। तथाहि—एकं सामान्यम्, अनेके विशेषाः; तथा नित्यं सामान्यम्, अनित्या विशेषाः; तथा निरवयवं सामान्यम्, सावयवा विशेषाः; तथा अक्रियं सामान्यम्, सक्रिया विशेषाः; सर्वगतं सामान्यम्, असर्वगता विशेषाः। ततश्च तद्यदि सामान्यरूपम्, कथं विशेषरूपम्? विशेषरूपं चेत्, कथं सामान्यरूपम्? इति।

किं च;—सामान्यविशेषोभयरूपत्वे सति वस्तुनः सकललोकप्रसिद्धसंव्यवहारनियमोच्छेदप्रसङ्गः; तथाहि—विषमोदककर्पूरकर्कादिद्रव्यवर्त्यपि नानास्वभावमेकं सामान्यं वर्तते। ततश्च न विषं विषमेव, मोदकाद्यभिन्नसामान्याव्यतिरेकात्; नापि मोदको मोदक एव, विषाभिन्नसामान्याभेदात्॥

---

१. न हि पिण्डशिवकादिव्यतिरिक्तं मृद्द्रव्यमनुभूयते। २. पर्यायेभ्यो द्रव्यस्य। ३. पर्यायस्य तावत्। ४. पर्यायद्रव्ययोः। ५. नित्यानित्यनिराकरणेन। ६. भेदाश्च। ७. आदिशब्दाद्गादिः। ८. भेदः। ९. घृतादि। १०. मोदकस्य। ११. इतरेतराभिन्नसामान्यभेदेन।

किं तर्हि उभयमपि उभयरूपम्? । ततश्च विषार्थी विषे प्रवर्तेत मोदके च, एवं मोदकार्थ्यपि मोदके विषे च । लोकश्च विषार्थी विष एव प्रवर्तते, न मोदके; मोदकार्थ्यपि मोदक एव, न विषे; इत्यस्य नियमस्योच्छेदः स्यात् । तथा च विषे भक्षिते मोदकोऽपि भक्षितः स्यात्, मोदके भक्षिते विषं भक्षितं स्यात्; तथा च सति प्रतीतिविरोधः स्यात् । एवं क्षीरमपि न क्षीरमेव, कर्काद्यनर्थान्तरभूतसामान्याऽव्यतिरेकात्; कर्कोऽपि न कर्क एव, क्षीराद्यव्यतिरिक्तसामान्याव्यतिरेकादेव । ततश्च इहापि क्षीरार्थी न क्षीर एव प्रवर्तेत, अपि तु कर्केऽपि; एवं कर्कार्थ्यपि न कर्क एव, किं तर्हि? क्षीरेऽपि। न चेत्थमनियमेन प्रवृत्तिर्दृश्यते ।

स्यादेतत्,–"विषादिषु विशेषरूपताप्यस्त्येव, सा तदर्थिनो नियमेन प्रवृत्तेर्बीजम्, तद्भक्षणे च नान्यभक्षणं स्यात्; इति" ॥

एतदयुक्तम्, विकल्पानुपपत्तेः; तथाहि—विषादिषु विशेषरूपता मोदकादिविशेषरूपव्यावृत्ता वा स्यात्? स्वरूपनियता वा? । न तावन्मोदकादिविशेषरूपव्यावृत्ता, तदनर्थान्तरभूतसामान्याव्यतिरेकात्; व्यतिरेके चोभयरूपवस्तुवादहानिप्रसङ्गात्; व्यतिरिक्तस्य तिरस्कृतपक्षस्य च विरोधेन तिरस्कृतत्वात् । नापि स्वरूपनियता, मोदकादिविशेषसामान्यानर्थान्तरत्वात्; तदर्थान्तरत्वे च सैव विशेषरूपता अर्थक्रियार्थिप्रवृत्तिविषयत्वाद् परमवस्तु, तदन्यविशेषसामान्यलक्षणस्य अवस्तुत्वात्; सैव च तादृशी नास्त्येवास्ति, अर्थिनः प्रवृत्त्यभावात् । इत्यलमुभयरूपवस्तुवादाभिमान ॥

तथा चोक्तम्—

१ विषमोदकयोः । २. सामान्यविशेषोभय[illegible] । ३. [illegible] । ४ अनुभव ५. विषार्थिनः । ६. [illegible] प्रवर्तेत । ७. विषादि । ८. मोदकादि । ९. [illegible] । १०. [illegible] ।
[illegible] । ११. अर्थिनः ।

प्रवृत्तिनियमो न स्याद् विषादिषु तदर्थिनः ।
मोदकाद्यपृथग्भूत—सामान्याभेदवृत्तिषु ॥ १ ॥

भेदे चोभयरूपैक–वस्तुवादो न युज्यते ।
भेदाभेदविकल्पस्तु विरोधेनैव बाधितः ॥ २ ॥

विशेषरूपं यच्चेष्टं तत्प्रवृत्तेर्नियामकम् ।
साध्वेतत्, किन्तु वस्तुत्वं तस्यैवेत्यं प्रसज्यते ॥ ३ ॥

तथा परेणाप्युक्तम्,—

सर्वस्योभयरूपत्वे तद्विशेषनिराकृतेः ।
नोदितो दधि खादेति, किमुष्ट्रं नाभिधावति ? ॥१॥

यथाहि–उष्ट्रेऽपि स्याद्दधि, नापि तं पयोऽष्ट्र, येनान्योऽपि स्यादुष्ट्रः । तथा दध्यपि स्यादुष्ट्रः, नापि तदर्थं दधि, येनान्येऽपि स्यात् । तदेवमनयोरेकस्यापि कस्यचित्तद्रूपभावस्याभावात्–स्वरूपस्य चाऽतैद्धावितः स्वनियतस्याभावात् न

१. भेदे सामान्यादेर्व्यावृत्तिपक्षे । २. द्वयस्यापि प्रत्येकमेवैकत्वात् । ३. सामान्यविशेषयोः । ४. विषादिषु । ५. विषादिविषयायाः । ६. विशेषस्य । ७. सामान्यविशेषरूपत्वे । उभयग्रहणमनेकान्तोपलक्षणम् । ८. अस्मिन् सति किम् ? इत्याह–'तद्विशेष॰' उष्ट्र उष्ट्र एव, न दधि, दधि दध्येव, नोष्ट्रः इत्येवंरूपस्य विशेषस्य ॥ ९. पुरुषः । १०. खादितुम्, इति शेष । ११. केनचित्प्रकारेण । १२. उष्ट्र एव । १३. कारणन । १४. दध्यादि । १५. दध्येव । १६. कारणेन । १७ उष्ट्रादि । १८. एतेन 'सर्वस्योभयरूपत्वे' इति पद व्याख्यानम् । १९. 'तद्विशेषनिराकृतेः' इत्येतत् 'तदेवमनयो.' इत्यादिना व्याचष्टे । २०. उभयथा हि दध्युष्ट्रयोर्विशेषः स्यात्, दधिरूपाभावो वोष्ट्रे भवेत्, उष्ट्रस्वरूप वा दध्यगुभविन्युष्ट्रस्वरूप एव नियत स्यात् । एव दध्यपि वाच्यम् । आद्यस्य तावदाभव 'तद्'इत्यादिना द्वितीयस्य च 'स्वरूप'इत्यादिना कथ्यते । २१ दध्न उष्ट्रस्य वा ।

कश्चिद्विशेषः, इति । ततश्च दधि खादेति चोदितः उष्ट्रमपि खादेत् ॥

अथास्त्यतिशयः कश्चिद्, येन भेदेन वर्तते ।
स एव दधि सोऽन्यत्र नास्तीत्यनुभयं परम् ॥ १ ॥

अथानयोः कश्चिदतिशयोऽस्ति, येनायं तथानोदितः क्षीरविकार एव प्रवर्तते, नान्यत्र । एवं तर्हि 'स एव'अतिशयो[1]ऽर्थक्रियार्थिप्रवृत्तिविषयः [2]तत्फलविशेषोपादानभावलक्षितस्वभावं हि वस्तु 'दधि' इति । 'स' च तादृशः[3] स्वभावः 'अन्यत्र[4] नास्तीति' प्रवृत्त्यभावाद्दध्यर्थिनः । तस्मान्नोभयरूपम्; इत्येकान्तवादः ॥

इति तृतीयपूर्वपक्षः ॥३॥

एवमभिलाप्यानभिलाप्यमपि विरोधबाधितत्वादेवानुद्घोष्यम् । तथाहि—अभिलप्यते यत् तदभिलाप्यम्, एतद्विलक्षणं चानभिलाप्यम्, इति । ततश्च यदि तदभिलाप्यम्, न तर्हि अनभिलाप्यम्; अनभिलाप्यं चेत्, न तर्ह्यभिलाप्यम्; इति, एकस्यानेकविरुद्धधर्माभावात् ॥

इति चतुर्थपूर्वपक्ष ॥ ४ ॥

किं च;—विरोधिधर्माध्यासितस्वरूपत्वाद्वस्तुनोऽनेकान्तवादिनो मुक्त्यभावप्रसङ्गः; तथाहि—एतदात्माङ्गनाभवनमणिकनकधनधान्यादिकमनात्मकम्[5], अनित्यम्, अशुचि,

१. तत्साध्या या अर्थक्रिया, तया अर्थी यः पुरुषः । २. दध्नैव साध्यत्वात् तत्फलविशेषः, स चासौ फलविशेषश्च, तस्योपादानभावो हेतुभावः, तेन लक्षितः स्वभावो यस्य वस्तुनः, तदेव दधि, इति वृत्ता । ३. अनन्तरोक्तदधिस्वभावः । ४. उष्ट्रे, कुतः ? दध्यर्थिन उष्ट्रे प्रवृत्त्यभावात्
५. परैः परिकल्पितान्वयाद्यात्मशून्यम् ।

दुःखम्, इति कथञ्चिदिच्छायां, भावनेत्यपि भावनम्, यत्नेन तथाभिनिवेशादश्रद्धायाम्, भावनाप्रकर्षविशेषतो वैराग्यमुत्जायते; ततो मुक्तिः । तथाहि—आत्मात्मीयदर्शनमेव मोहः, तत्पूर्वकः पुत्रात्मीयस्नेहो रागः, तत्पूर्विकैवानुरागविषयोपरोधिनि प्रतिघातविद्वेष, इति कृत्वा सर्वमुपपद्यते । यदा तु तदात्मात्मनादिर्वैः भ्रामकार्येऽपि, तदा पर्यायकाकवमोऽभावात्, भावेऽपि मिथ्यारूपत्वात्, वैराग्याभावः, तदभावाच्च मुक्त्यभावः, इति ॥

इति पञ्चमपूर्वपक्षः ॥ ५ ॥

इतिपूर्वपक्षग्रन्थः ॥

तदेवमेते मन्दमतयो दुरन्तमोहसागरमीमांसाः स्वयं नष्टा, परानपि नाशयन्ति मन्दमतीन् । अतः प्रतिविधीयते—

तत्र यत्तावदुक्तम् " कथमेकमेव घटादि रूपं वस्तु सदासच्च भवति ? " तदेतदगोपालाङ्गनादिप्रतीतमनालोच्यैवमेव । यतः-स्वद्रव्यक्षेत्रकालभावरूपेण सद्वर्तते; परद्रव्यक्षेत्रकालभावरूपेण चासत्; ततश्च सच्चासच्च भवति । अन्यथा, तदभावप्रसङ्गात्; तथाहि—यदि तत् यथा स्वद्रव्यक्षेत्रकालभावरूपेण सद्वर्तते, तथैव परद्रव्यक्षेत्रकालभावरूपेणापि स्यात्; ततश्च तद् घटादि वस्त्वेव न स्यात्, परद्रव्यक्षेत्रकालरूपेणापि सत्त्वात्, तदन्यद्रव्यवत् । तथा यदि, यथा परद्रव्यक्षेत्रकालभावरूपेणासत्, एवं स्वद्रव्यक्षेत्रकालभावरूपेणापि स्यात्, ततश्च तद् घटादि वस्त्वेव न स्यात्, परद्रव्यक्षेत्रकालभावरूपेणासत्त्वे सति स्वद्रव्यक्षेत्रकालभावरूपेणाप्यसत्त्वात्,

१. [illegible] २. [illegible] । ३. [illegible] । ४ [illegible] । ६. [illegible] । ७. [illegible] । ८. [illegible] । ९. [illegible] ।

अहो! दुरन्तो मोहः, स्ववाचोऽपि प्रतिपाद्यमनेकान्तं न प्रतिपद्यते। तथाहि—'पार्थिवद्रव्यसत्त्वमेव विशिष्टमबाद्यसत्त्वम्,' इति ब्रुवन्, न च सदसद्रूपं वस्तु प्रतिपद्यते; इत्यपूर्वो विभ्रमः। न हि स्वपरसत्त्वाभावाभावोभयरूपतां विहाय वस्तुनो विशिष्टतैव संभवति। न च तेनैव स्वभावेन पार्थिवद्रव्यत्वेन सद्वर्तते, तेनैवाबादिद्रव्यत्वेनासत्, अभिधाननिमित्तत्वे सति एकत्र सदसत्त्वयोर्विरोधात्; तथाहि-तेनैव स्वभावेन सचासच, इति? विरुद्धमेतत्॥

स्यादेतद्,—तदबादिद्रव्यासत्त्वस्य परिकल्पितत्वाद् यथोक्तदोषाभावः; इति। सोऽयं गेंडुप्रवेशेऽक्षितारिकाविनिर्गमन्यायः; तथाहि—तदबादिद्रव्यासत्त्वस्य परिकल्पितत्वात् असत्त्वात् तद्रूपेणाप्यस्तित्वप्रसङ्गः; अनिष्टं चैतत्, इति॥

स्यादेतद्, पार्थिवद्रव्यसत्त्वव्यतिरिक्तमबाद्यसत्त्वं परिकल्पितं, पार्थिवद्रव्यसत्त्वमेव पुनरबाद्यसत्त्वस्वभावमिष्यत एव, इत्यतोऽनपराधः; इति॥

---

१. आदिमध्यान्तरीदः। २. येन पार्थिवद्रव्यसत्त्वमेव विशिष्टमिति। ३. अबाद्यसत्त्वस्य स्वभावतया। ४. उभयनिमित्तभावेऽपि वस्तुयाथातिपत्तेरपूर्वत्वम् ५. कथम्?। ६. विशेषणं विना वैशिष्ट्यायोगात्। ७. घटादि ८. एतदेव व्याहन्यते। ९. येनैव सत् तेनैवासत्त्वस्याद्, इत्यर्थः। १०. न सर्वैक द्विरूपम्, इति भावः। ११. प्रस्तुतदोषपरिहारेणाधिकतरदोषान्तरापत्तिः, इत्यर्थः। १२. पार्थिवद्रव्यसत्त्वे। यथा घटादौ पटादिद्रव्यासत्त्व परिकल्पितत्वादसद्, इतिकृत्वा पटादिरूपेणास्तित्वमेव, एवमबादिरूपेणाप्यस्तित्व स्यात्। १३.अबादिद्रव्यसत्त्वरूपेण पार्थिवद्रव्यसत्त्वस्य। १४ पार्थिवद्रव्यसत्त्वव्यतिरिक्तांशेनैव अबाद्यसत्त्वं परिकल्पितमुच्यते। पार्थिवद्रव्यसत्त्वव्यतिरिक्त स्वेतदस्त्येव, इत्युक्तदोषाभावः, इति पराभिप्रायः। (परमार्थतः स्वमत्पादमवादबाद्यसत्त्वस्य। एकरूपम्। वस्तुस्थित्या)[कोष्ठकान्तर्गत टिप्पनक कस्य मूलपाठस्य, इति न ज्ञायते। तच्चिन्त्यं धीधनैः।]

अहो ! दुरन्तः स्वदर्शनानुरागः, प्रत्युक्तमपि नावधारयति; यतः-न च तद् येनैव स्वभावेन पार्थिवद्रव्यत्वेन सद्वर्तते तेनैवाबादिद्रव्यत्वेनासद्; इत्यादि तदेवावर्तते, इति,अलं स्वदर्शनानुरागाहतचेतसा सह प्रसङ्गेन, इति ॥

अपरस्त्वाह—'सदसद्रूपं वस्तु' इत्यत्रासत्पक्षे प्रसज्यप्रतिषेधो वा स्यात् ? पर्युदासो वा ? ।

किञ्चातः ? ।

उभयथापि दोषः; तथा हि-यदि 'सच भवति' इत्यसत् ? सकलविनिवृत्तिमात्रं निरुपाख्यमसत् ? ; ततश्च तस्य प्रमाणगोचरातीतत्वाद्वस्तुधर्मत्वानुपपत्तिः ।

अभ्युपगमे वा वस्तुन एव निरुपाख्यत्वप्रसङ्गः; तथाहि-न निरुपाख्यस्वभावं सोपाख्यस्वभावं भवितुमर्हति ।

अथ सतोऽन्यदसद्, सदन्तरमेवासद्, इति ? एवमपि तस्य सदात्मकत्वादेव सदसद्रूपत्वानुपपत्तिः; तथाहि—न 'सत् सदन्तरात्मकम्' इति सचेतसो वक्तुं युज्यते, इति ॥

एतदप्ययुक्तम्, भगवदर्हन्मतापरिज्ञानात्, पक्षद्वयेऽपि दोषाभावात् ॥

कथमभावः ? इति ॥

उच्यते—यद्यपि सकलनिवृत्तिमात्रं निरुपाख्यमसत्, तथापि स्वरूपेण सत्त्वात्, तद्रूपेण चासत्त्वात्, सदसद्रूपमेव; इति ।

---

१. नैयायिकादिः । २. कोऽर्थः ? तुच्छधर्मत्वम् । ३. प्रसज्यप्रतिषेधपक्षम् । ४. एतदेव स्पष्टयति । ५. पर्युदासपक्षे । ६. अपरः । ७. पररूपेण ।

८. अयमाशयः [illegible] वर्तते । न खलु [illegible] नाम, तत्र वस्तुनि [illegible], यतो यद्यपि 'स्व भवतीति असत्' प्रसज्यप्रतिषेधस्य, तथापि पररूपादिरूपेण [illegible] प्रतिषेधः [illegible] विवक्षित [illegible] सत्त्वात्, [illegible] —[illegible] इति प्रसज्यप्रतिषेधपक्षेऽप्यदोषाभावः, [illegible] भवति ।

---

* पटादेः ।

ततश्चैवं न सर्वथा सत्त्वमसत्त्वपरिहारेण व्यवस्थितम्, चासत्त्वं सत्त्वपरिहारेण ॥

न चानयोरविशेष एव, भिन्ननिमित्तत्वात्; तथा हि "स्वद्रव्यादिरूपेण सत्, परद्रव्यादिरूपेण चासत्;" इत्युक्तम्। ततश्च तद् यत एव सत् अत एवासत्, परद्रव्यादिरूपासत्त्वे सति स्वद्रव्यादिरूपेण सत्त्वात्; तथा यत एवासत् अत एव सत्, स्वद्रव्यादिरूपसत्त्वे सति परद्रव्यादिरूपेण सत्त्वात् ।

अत एव चैकत्र सदसत्त्वयोर्विरोधो न संभवति, भिन्ननिमित्तत्वात् धर्मिभावात् । एतच्चोत्तरत्र प्रपञ्चयिष्यामः अनुभवसिद्धत्वाच्च; तथाहि-स्वपररूपाभ्यामावृत्तव्यावृत्तरूपं

तद्वस्तु अनुभूयते ॥

स्यादाशङ्का,-'स्वरूपाव्यावृत्तिरेव पररूपव्यावृत्तिः' इति एषाप्ययुक्ता, विहितोत्तरत्वात् ॥

यस्मादेवं तस्मात् समुत्सारितपक्षपातैर्न्यायविद्भिर्युक्तियुक्तत्वात् सदसद्रूपं वस्त्वङ्गीकर्तव्यम् । आह च—

यस्मात्सत्त्वमसत्त्वं च न विरुद्धं मिथो द्वयम् ।
वस्त्वेकं सदसद्रूपं ननु तत् किं न युज्यते ? ॥ १ ॥

१. तदनात्मकत्वेन । २. भावात्मकत्वेन । ३. भावात्मकत्वे ४. स्वद्रव्यादयः सत्त्वकल्पनानिमित्तम्, परद्रव्यादयश्चासत्त्वकल्पनायाः । ५. अनुभवे च तद्बोधस्यानेकरूपतायामिव को विरोधः ? ६. वस्तुतः स्वरूपाव्यावृत्तिः पररूपव्यावृत्तिश्च द्वेऽप्यनुभूयेते; इत्युभयात्म वस्तु, इति आचार्येण स्थापिते पर आशङ्कते-स्यादाशङ्केति । ७. एकरूपा । ८. 'न स्वरूपसत्त्वमेव पररूपासत्त्वम्' इत्यादिना भिन्ननिमित्तत्वेनानयोरेकत्वाभावात्; तत्त्वतोऽन्यरूपाभावमन्तरेणान्यथावृत्त्या(स्व सिद्धे । ९. शबलरूपतया ।

यदप्युक्तम्,—“ सदसद्रूप वस्त्वभ्युपगच्छता सत्यमसत्य-
व वस्तुधर्मतयाभ्युपगतं भवति ”; एतदिष्यत एव ॥

यत्पुनरिदमुक्तम्—“ तत्रश्चात्रापि पक्षद्वयम्; धर्मधर्मिणोः किं तावद्भेद,—” इत्यादि। अत्रापि सर्वथा भेदपक्षोदितोऽभेदपक्षोदितश्च दोषोऽनभ्युपगमतिरस्कृतत्वादेव न नः क्षितिमावहति। भेदाभेदपक्षस्त्वभ्युपगम्यत एव ॥

आह—अन्यत्रापि “येनाकारेणभेदस्तेन भेद एव,”—इत्यादि दूषणमुक्तम्।

उक्तमिदम्, अयुक्तं तूक्तम्, अविदितविकल्पस्यार्थापरिज्ञानात्, अन्योन्यव्याप्तिभावेन भेदाभेदपक्षस्य जात्यन्तरात्मकत्वात् केवलभेदाभेदानुपपत्तेः। न हि ‘अन्योन्याननुविद्धावेतौ’ इति जैनमतम्, अभेदाननुविद्धस्य केवलभेदस्यासिद्धेः, भेदाननुविद्धस्य चाभेदस्यासिद्धेः। अतः—‘येनाकारेण भेदस्तेन भेद एव’ इत्यर्थशून्यमेव ॥

अथ “ धर्मधर्मिणोर्भेदाभेद. ” इति कोऽर्थः ? कथञ्चिद्भेदः कथञ्चिदभेद, इति। तत्र धर्माणां मिथो भेदात् प्रतिनियतधर्म्यभिन्नत्वाच्च कथञ्चिद्भेदः। तथाहि—न धर्माणां धर्मिणा सर्वथैकत्वे धर्मतयापि भेदो युज्यते, इति प्रतीतमेवद्। तथा धर्माणामेवान्योन्यमन्तरीकृतधर्मिस्वरूपत्वाद्धर्मिणोऽपि चान्यन्तरीकृतधर्मस्वरूपत्वाच्च कथञ्चिदभेदः, इति। न चात्यन्तभेदे धर्मधर्मिकल्पना युज्यते, अतिप्रसङ्गात् ॥

स्यादेतद्,—अपेक्षितैव धर्मधर्मिकल्पना, न तत्त्वतः, इति।

---

१. न ह्युपगमा एव बाधायै स्युः। २ प्रयोग। ३. [illegible]भेदपक्षस्य।

४. “ न घटो घट एवेति, न भिन्नः भिन्न एव वा।
[illegible] ॥ १ ॥
न घटः [illegible] ।
[illegible] ॥ २ ॥ ”

• [illegible]।

एतदप्ययुक्तम्, दृष्टविरोधात्। न च दृष्टेऽनुगतमनुगतं तत्, अनुवृत्त्यावृत्तस्वभावं च वस्त्वध्यक्षतोऽवसीयते। न चाऽऽदर्शदहनादिप्रतीतानुभयापलापः शक्यते कर्तुम्। अनुभवप्रतीते पुरोऽवस्थिते घटादौ तद्वत्तद्रूप एवोपजायते; अन्यथा तदभावप्रसङ्गात् ॥

स्यादेतत्,—एकस्वभाव एवासावनुभयो घटप्रतिच्छायतयोपजायमानः घटादिप्रतिभासव्यवच्छेदेन स्थाप्यते। न पुनरस्य भावतो द्वे रूपे। तथा चोक्तम्-"एकोपलम्भानुभवाद् 'इदं नोपलम्भे' इति बुद्धेः 'उपलम्भे वा' इति कल्पिताया समुद्भवाति"।

एतदप्ययुक्तम्,—विहितोत्तरत्वात्, 'तत्स्वरूपसत्त्वमेव पररूपासत्त्वम्' इति निर्लोठितम् ॥

किञ्च—एकान्तपर्यायनयमतानुसारिपक्षे कल्पनायोगात्; तथाहि—सा वस्तुनि समुत्पन्ने वा स्याद्? अनुत्पन्ने वा? न तावदनुत्पन्ने, तस्यैवासत्त्वात्; उत्पन्नेऽपि च गृहीते वा स्याद्? अगृहीते वा? न तावदगृहीते, अतिप्रसङ्गात्; गृहीतेऽपि च तद्ग्राहकज्ञानस्याविकल्पकत्वात्, विकल्पज्ञानस्य चातद्विषयत्वात्, तद्भावकाले च तदसत्त्वात्। तत्रैव कल्पना, इति चेत्? न, विकल्पानुपपत्तेः; तथाहि—तत्राप्युत्पन्ने वा स्याद्? अनुत्पन्ने वा? नानुत्पन्ने, असत्त्वात्; नाप्युत्पन्ने, उत्पत्त्यनन्तरापवर्गित्वात्। विकल्पनारूपमेवोत्पद्यते, इति चेत्? न, तस्य हेत्वयोगात्। हेत्वयोगश्च स्वलक्षणादनुत्पत्तेः। स्वलक्षणानुभवाहितसंस्कारात् तज्जन्म, इति चेत्? न, संस्का-

१ सङ्कीर्णत्वेन नियतत्वाभिधेः। २ वस्तु। ३. नीलादौ। ४. एकस्यैव घटादेरुपलम्भानुभवात्, परम् 'इदं घटादिकं समुपलम्भे, इदं घटादिकमुपलम्भे वा' इति विकल्पिकाया बुद्धेः समुद्भवः स्यात्। ५. वस्तुनि। ६ उत्पन्नवस्तु। ७. उत्पन्नवस्त्वविषयत्वात्। वर्तमानकालभाविस्वलक्षणानुभवजसंस्कारात्। ८. विकल्पज्ञान। ९. उत्पन्नवस्तु। १०. ज्ञाने एव, न तु बाह्येऽपि विषये। ११. ज्ञानेऽपि। १२ विनाशित्वात्।

स्वस्यापि स्वलक्षणेतररूपानतिक्रमात्; स्वलक्षणरूपत्वे स एव दोषः। सामान्यलक्षणरूपत्वे तु ततस्तदुदय एव कथम्? इति वाच्यम्।

स्यादेतद्,—यद्यपि कल्पनाऽस्वलक्षणमेव, तदा अपि स्वसंविदो स्वलक्षणत्वात्; उक्तं च—"कल्पनाऽपि स्वसंवित्ताविष्टा, नार्थे, विकल्पनात्" इति।

एतदप्ययुक्तम्, अर्थविकल्पाकारव्यतिरेकेण तत्स्वसंवित्त्यसिद्धेः; सिद्धौ वा, कल्पनायोगात्। अतीतकालानुभूतसंस्कारस्तथापरिपच्यमानः स्वलक्षणानुभवजनितसंस्कारोपपादितविशेषो हेतुः, इति चेत्? न, तस्य स्वलक्षणानुभवजनितसंस्काराद्विशेषः, असिद्धेः।

असिद्धिश्च तस्य तत्त्वतोऽनुपकारात्; तथाहि—स तस्य विकल्पादिमसंस्कारविशेषस्यानुत्पन्नस्योत्पन्नस्य निदर्शय वोपकुर्याद्? इति भेदाः। न तावदनुत्पन्नस्य, तस्यैवासत्त्वाद्, असतश्चोपकारायोगात्; नाप्युत्पन्नस्य, तस्यानाधेयातिशयत्वाद्, अतिशयाधानमन्तरेण चोपकाराभावात्, अतिशयाधाने च तदर्थान्तरभूतातिशयमप्यपेक्ष्य भूयः तदुपकरणमेवातिशयाधान, स यद्युपकार, इति चेत्? न, उपादानकारणविशेषाधानमन्त

१. स्वलक्षणस्वरूपस्य अनतिक्रान्तत्वं *तद्भावकाले च तद्भावान्वयम्। २ सामान्यरूपत्वस्य रसाक्षिकत्वप्रतिभागेऽप्यर्थस्वरूपस्य कृतः कस्माद्विकल्पनात्स्योदयः? । ३. सामान्यस्याव्यविकारित्वात् । ४. कल्पना । ५. विकल्पोपादानकारणभूतस्यातीतकालीनानुभवजनितसंस्कारस्य । ६. स्वलक्षणानुभवजनितसंस्कारः । ७. विकल्पेन यदोत्पद्यतेऽर्पणातीतकाले विशेषो यः संस्कारविशेषः, तस्य । ८. विकल्पस्य । ९. तदर्थोपकरणं हि अतिशयाधाने सोऽतिशयो भिन्न एव स्याद्, यदतिशयाधानकाले स उपकारोऽन्य एव स्यात्, एवमनवस्थापत्तेः । १०. अतीतविकल्पजनकसंस्कारवर्तमानानुभवजसंस्काराभ्याम् । ११. अतीतविकल्पजसंस्कारविशेषाधानं विना ।

विकल्पज्ञान ।

रेण ततः कार्यविशेषासिद्धेः न चैककालभाविनाऽन्यतो भवेदे-ष्यत एव भवेतातिशयाधानं युज्यते, तन्निबन्धनस्य तत्तद्विशे-सिद्धेः, तदभ्युपगमे च तत्राप्ययमेव वृत्तान्तः, इति । यदि श्चिदेतद्, एवं निबन्धनपरम्परायामपि वाच्यम्, इति । न निरुद्धस्य, तस्यैवाविद्यमानत्वाद्, असतश्चोपकारकरणाधा-अभ्युपगमे चातिप्रसङ्गाद् । अतः साधूक्तं 'हेत्वयोगात्' इ-क्षणिकैकान्तपक्षे च फलभावानुपपत्तेः, इति; एतच्च यथास्था-

यथोक्तम्—" भेदाभेदमभ्युपगच्छतावश्यं चेदमभि-धेयम्-इह धर्मधर्मिणोर्धर्मधर्मितया भेदः, स्वभावतः पुनरभे-इत्यादि । एतदपि 'धर्माणां मिथो भेदात् प्रतिनियतधर्म-तत्त्वाच्च कथञ्चिद्भेदः' इत्यादिना प्रत्युक्तम्, प्रकारान्त-भेदाभेदासिद्धेः ॥

यदप्युक्तम्, " संविदिविधिश्च विषयव्यवस्थितम्" न सदसद्रूपं वस्तु संवेद्यते उभयरूपस्य संवेदनस्याभावा-इत्यादि । एतदपि 'अनुवृत्तव्यावृत्तरूपभावं च वस्तु-व्यतोऽवसीयते' इत्यादिना परिहृतम्, उभयरूपस्य संवे-द्यमानत्वात् ॥

यच्चोक्तम्—" न च कार्यद्वारेणापि सदसद्रूपं व-प्रतिपत्तुं शक्यते, यतो नोभयरूपं कार्यमुपलभ्यते " इत्यादि तदप्यनवद्यम्, वस्तुविधिप्रतिषेधरूपोपलम्भात् [illegible] न्यायात् ।

" न च तत्कार्यकरणे प्रवर्तमाने [illegible]

[illegible]

कञ्चिच्च करोति, एकस्य करणाकरणविरोधात्;" इत्याद्यप्यसारम्, विरोधासिद्धेः; तथाहि—पर्यायात्मना करोति, द्रव्यात्मना न करोति; कुत एकस्य करणाकरणविरोधः? इति। अथवा स्वकार्यकर्तृत्वेन करोति, कार्यान्तराकर्तृत्वेन न करोति; अतः केनचिदाकारेण करोति, केनचिन्न करोतीति; कोऽत्र विरोधः? । न च स्वकार्यकर्तृत्वमेव कार्यान्तराकर्तृत्वम्; यदि स्यात्, यथा स्वकार्यं करोति, एवं कार्यान्तरमपि कुर्यात्, कर्तृत्वानन्यत्वादकर्तृत्वस्य; विपर्ययो वा, ततश्चाकारणत्वम्, इति ॥

स्यादेतत्,—किं हि नाम कार्यान्तराकर्तृत्वमन्यत्? यदाऽक्रियानन्यावयुक्त्यनुसारेणाकारणत्वं प्रतिपाद्यते; किन्तु स्वकार्यकर्तृत्वमेवैकस्वभावं कार्यान्तराकर्तृत्वम्, इति।

हन्त, तर्हि 'येनैवाकारेण करोति, तेनैव न करोति' इत्येतदायातम्। एवं चाभिधानमित्यर्थे सापेक्षत्र कर्तृत्वाकर्तृत्वयोर्विरोधः, इति; तथाहि—तेनैव स्वभावेन करोति, न करोति च इति? व्याहतमेतद्, एकस्वभावस्यैकत्रोपयोगात्।

कार्यान्तराकर्तृत्वं तत्र परिकल्पितम् इति चेत्? तदप्यमनोहरम्, कार्यान्तराकर्तृत्वस्य तत्र परिकल्पितत्वाद्-वस्तुतोऽसत्त्वात्, तद्भावापत्त्या कार्यान्तरकर्तृत्वप्रसङ्गात् ॥

---

१. नैमित्तिकेन रूपेण तथा परिणतेः । २. मृदादिरूपेण तथाऽपरिणतेः । ३. कार्यमधिकृत्योक्तया कारणमधिकृत्याह-। ४. एतदेवमेव । ५. 'तर्हि' इति शेषः । ६. यथा वा कार्यान्तरं न करोति, एवं स्वकार्यमपि न कुर्यात् । ७. अकर्तृत्वानन्यत्वात्कर्तृत्वस्य । अवधूरित्यु(त्य)क्तम् (?)। ततश्चैवमनेनप्रकारेण अकारणत्वम् । इति कुर्वन् कारणान्तराणाम् । ८. अधिकृतकारणस्य । ९. नैव किञ्चिदन्यत् । १०. एष च संक्षेप इत्यर्थः' ११. स्वभावेन । १२. अन्यथा सर्वैकत्वापत्तेः । १३. कारणे । १४. कार्ये । १५. कार्यान्तराकर्तृत्वस्याविद्यमानत्वात् । १६. कार्यान्तराकर्तृत्वाभावस्य । १७. न हि तद्भावमन्तरेण तद्भावः, इति भावः ।

अथाशङ्का,—स्वकार्यैकर्तृत्वव्यतिरिक्त
परिकल्पितम्, स्वकार्यकर्तृत्वमेव पुनः
मभ्युपगम्यत एव, इति ।

एतदप्ययुक्तम्, दत्तोत्तरत्वात्; तथा
येन करोति तेनैव न करोति, इत्येतदापन्नम्, इत्या
अनेनैव "सर्वात्मना च करणे तद्भावरूपेण स
प्रतिक्षिप्तम्, अभावस्य वस्तुधर्मत्वात् कथञ्चि
कार्यान्तराकारणत्वाद्; इति । तस्माद्
सद्रूपवस्तु; तथा चोक्तम्—

"यस्मात् प्रत्यक्षसंवेद्यं, कार्यतोऽप्यवगम्य
तस्मादवश्यमेष्टव्यं, वस्त्वेकं सदसदात्मकम्"
इति ॥

अत्रान्यस्त्वाह—ननु च 'वस्तुनः स्वरूपेण सत्त्व
पेण चासत्त्वम्' इति, एतदिष्यत एव' इति [illegible]

एतदप्ययुक्तम्; स्वमतविरोधात्; तथाहि—
'वस्तुन एव सत्त्वमसत्त्वं च धर्मौ' इत्येष्टव्यं,
धर्मधर्मिणोरन्यत्वमनन्यत्वमन्यानन्यत्वं च, इति । किं
वद्यन्यत्वम्, अवस्तु [illegible]
स्वरूपेण सत्त्वरूपेण चासद्' इत्यभ्युपगमात् । धर्मी
सत्त्वासत्त्वरूपेणासत्त्वादवस्तुत्वप्रसङ्गः । एवं धर्माणामपि
व्यतिरिक्तत्वात्स्वरूपेण सत्त्व पररूपेण चासत्त्वम्, इति

१. स्वकार्यकर्तृत्वव्यतिरिक्तलक्षण कार्यान्तराकर्तृत्व परि
[illegible], स्वकार्यकर्तृत्वाव्यतिरिक्त [illegible] इत्यर्थं, [illegible]
[illegible] । २. [illegible] । ३. पूर्वप्रकार [illegible]
[illegible] । ४. [illegible], इति भाव । ६. [illegible]
[illegible] । धर्मो [illegible] [illegible], इति [illegible]
[illegible] । ८. [illegible] । ९ [illegible] ।

अथानन्यत्वं, तयोरेकत्वप्रसङ्गः, एकस्माद्धर्मिणोऽनन्यत्वात्, तत्स्वात्मवत्; एवं च सति सदसत्त्वयोरभिन्नत्वात् तद्यथा स्वरूपेण सत्, एवं पररूपेणापि स्याद्; इत्याद्युक्तम्। असम्भविनौ च निराधारौ धर्मौ सदसद्रूपौ ॥

तथान्यानन्यत्वम्, अतोऽनेकान्तवादाभ्युपगमादेकान्तवादिनः स्वमतविरोधः; इत्यलं प्रसङ्गेन ॥

इति सदसदुभयरूपैकवस्तुवादः ॥

यथोक्तम्—" एतेन नित्यानित्यमपि प्रत्युक्तमवगन्तव्यं विरोधादेव " इत्यादि; एतदपि न सम्यक्, प्रमाणतस्तथोपगमात्; तथाहि—प्रत्यक्षेण नित्यानित्यमेव तदवगम्यते, अन्यथा तदवगमाभावप्रसङ्गात्; तथा च, यदि तदप्रच्युतानुत्पन्नस्थिरैकस्वभावं सर्वथा नित्यमभ्युपगम्यते; एवं तर्हि तद्विज्ञानजननस्वभावं वा स्याद्? अजननस्वभावं वा? यद्याद्यः पक्षः, एवं सति सर्वत्र सर्वदा सर्वेषां तद्विज्ञानप्रसङ्गः, तस्यैकस्वभावत्वात्; न चैतदेवं। कस्यचित्कदाचित्कस्यचिदेव तद्विज्ञानभावात्। न च 'सर्वथैकस्वभावस्य देशादिकृतो विशेषः' इति कल्पना युज्यते, तद्भावेऽनित्यत्वप्रसङ्गात्। 'सहकारिसमवधाने जनयति' इति चेत्? न, एकान्तनित्यस्यापेक्षायोगात्; तथाहि—सहकारिणा तस्य विशेषः क्रियते? न वा? इति पक्षद्वयम्, यदि क्रियते; किमर्थान्तरभूतः? अनर्थान्तरभूतो वा? इति, यद्यर्थान्तरभूतः, तस्यैव किमायातम्? 'स तस्य विशेषकारकः' इति चेत्? न, अनवस्थाप्रसङ्गात्; तथाहि—स विशेषस्ततो भिन्नः? अभिन्नो वा?

१. नित्यानित्यवस्तुनि । २. एवमनभ्युपगमे । ३. भावपदार्थे । ४. वस्तु । ५. क्षेत्रे । ६. प्रमातॄणाम् । ७. अधिकृतवस्तु । ८. वस्तुनः । ९. क्षेत्रकालादिभिर्विशेषाभावात् । १०. तादृशम् वस्तुनि । ११. प्रकृत मेव समर्थयति । १२. वस्तुनः । १३. न हि प्रकृतस्वभावानिवृत्तौ विना वस्तुनो विशेषः । १४. सहकारिकृतम् १५. वस्तुविज्ञानम् । १६. एककाले । १७. वस्तुनः । १८. समवधानेऽपि । १९. विशेषोऽर्थान्तर भूतः । २०. वस्तुनः । २१. मूलविशेषकृतः । २२. वस्तुनः ।

तदेवावर्तते, इत्यनवस्था, (चक्रकं वा) ।

अथानर्थान्तरभूतः, स विद्यमानः ? अविद्यमानो वा ? यदि विद्यमानः, कथं क्रियते ? करणे वाऽनवस्थाप्रसङ्गः ।

अथाविद्यमानः, व्याहतमेतत्, स ततोऽनर्थान्तरभूतोऽविद्यमानश्चेति, करणे वाऽनित्यतापत्तिरिति; तथाहि—तस्मिन् क्रियमाणे पदार्थ एव कृतः स्यात्, तदव्यतिरिक्तत्वात्तस्य । अथ माभूदेष दोषः, 'न क्रियते' इत्याश्रीयते, न तर्हि स तस्य सहकारी, अकिञ्चित्करत्वात्, भावे वाऽतिप्रसङ्गः, इति; तथाहि—यदि कञ्चन विशेषमकुर्वन्नपि स तस्य सहकार्यभ्युपगम्यते, सर्वभावानामेव तत्सहकारित्वप्रसङ्गः, तद्विशेषाकरणेनाविशेषात्, इति व्यर्था सहकारिकल्पना ॥

अथोच्यते—एवंभूत एव तस्य वस्तुनः स्वभावः, येनाविकृतोऽकारकमपि प्रतिनियतमेव सहकारिणमपेक्ष्य कार्यं जनयति, इति ।

एतदपि मनोरथमात्रम्, विकल्पानुपपत्तेः; यदि यदाभीष्टसहकारिसन्निधौ कार्यं जनयति, तदाऽस्यैतेनापादितसहकार्यपेक्षालक्षणः स्वभावो व्यावर्तते ? न वा ? इति वक्तव्यम्, यदि व्यावर्तते, अनित्यत्वप्रसङ्गः; स्वभावव्यावृत्तौ स्वभाववतोऽपि तदव्यतिरेकेण तद्वदेव निवृत्तेः । अथ न व्यावर्तते,

१. सहकारिणा विशेषः क्रियते । २. विद्यमानत्वाविशेषेण भूयोभूयः करणम्, इत्यनवस्था । ३ विद्यमानाऽव्यतिरिक्तो हि विद्यमान एव । ४. करणे वा अव्यतिरिक्तत्वाद्विद्यमानस्यानित्यताप्राप्तिरित्यर्थः, तथाहि—तस्मिन् अव्यतिरिक्ते विद्यमाने विशेषे क्रियमाणे पदार्थ एव कृतः स्यात् । ५. पदार्थे । ६. विशेषस्य । ७. सहकारिणा विशेषः । ८. आलोकादिकम् । ९. विज्ञानादि । १०. वस्तुनः । ११. अभिकाङ्क्षितसहकारि ।

कार्याजननप्रसङ्गः, तत्स्वभावानिवृत्तेः ; पूर्ववत् ; त
य एव तस्य कार्याजननावस्थायां स्वभावः ; जनना
मपि स एव, इति कथं जनयति ? सर्वदा वा जनन
इत्येवं तावदेकान्तनित्यपक्षे विज्ञानादिकार्यायोगात्
गमाभाव , इति ॥

अथ, अपि प्रकृत्यैकक्षणस्थितिधर्मकं एकान्तानि
पगम्यते ? एवमपि विज्ञानादिकार्यायोगात्, तद्वय
एव । न च सर्वथैकक्षणस्थितिधर्मिणो विज्ञानादिजन
घते, तस्यैवायोगात् ; तथाहि-क्षणस्थितिधर्मकं-क्षणा
मायमुच्यते, इति; अतोऽर्थादेवास्य द्वितीयादिष्वा
इत्यक्रमेणापि प्रतिपत्तव्यम्, न्यायानुगतत्वात्; तयो
त्वाद्धिधर्म्यो परस्परतोऽन्यत्वम् ? अनन्यत्वं वा ? इति वा

किं चातः ?

यद्यन्यत्वं, किं सर्वथा ? आहोस्वित् कथञ्चित्

१. आ[illegible]कार्यकालक्षणस्वभावानिवृत्तेः । २. [illegible]
३. [illegible] स्वभावानिवृत्ते. । ४. कार्यम्-(शेषः) । ५. [illegible]
६. [illegible] । ७. तेन सहकारिणा सह जननस्वभा[illegible]
[illegible] जनयति, सहकार्यभावान्न पूर्वमपि जनयति [illegible]
[illegible] ? न, सहकारिणा सह कार्यजननस्वभावत्वस्यापि नि[illegible]
[illegible] । [illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible] । ८. [illegible] । ९. [illegible]
१०. [illegible]

सर्वथा, ततो द्वितीयादिक्षणेऽपि स्थितिप्रसङ्गः, प्रथमक्षणस्थितेः द्वितीयादिक्षणास्थितिविभिन्नत्वान्यथानुपपत्तेः; तथा हि,-अनन्तपर्यायान्तविनिश्चितानां भावानामस्थिरैकान्तमिथ्या वर्तमानसमयभाविनी स्थितिर्न विरुध्यते, इति;एवं द्वितीयादिक्षणास्थितेरपि तदुत्पन्नाभेदे उक्तार्थाविरोधः, इति भावना ॥

अथ कथञ्चिदन्यत्वम्, इति ? अतोऽनेकान्तवादापत्त्या सिद्धान्तसिद्धिरेवास्माकमिति ॥

अथानन्यत्वम्, तदपि सर्वथा ? कथञ्चिद्वा ? इति कथनीयम्। यदि सर्वथा, प्रथमक्षणस्थितिरेव द्वितीयादिक्षणास्थितिः। सा च भावरूपा, ततश्च द्वितीयादिक्षणेऽपि स्थितिरेव स्यात्। द्वितीयादिक्षणास्थितेर्वा निरुपाख्यत्वात्-ऽस्या एव प्रथमक्षणस्थितित्वात् प्रथमक्षणेऽप्यभावप्रसङ्गः। अथ कथञ्चिदनन्यत्वम्, इति ? पूर्वोक्तो दोषः। अथ द्वितीयादिक्षणास्थितेरभावरूपत्वात् प्रथमक्षणस्थित्या अन्यानन्यत्वकल्पना युक्तिमती।

स्यादेतत्,-यदि अभावाद्भावभेदो विचार्य वर्तेत। अथ तदुत्तरकालभाविपदार्थान्तरस्थितिरेव विवक्षितस्य द्वितीयादिक्षणास्थितिरिति। हन्त! तर्हि सुतरामन्यानन्यत्वकल्पनायाः प्रसरः, तथा च सति पूर्वोक्तदोषानतिवृत्तिरेव। अथ द्वितीयादिक्षणास्थितिः, परिकल्पितत्वात् परिकल्पनीया, इति। एवं तर्हि तस्या परिकल्पितत्वादसत्त्वात् द्वितीयादिक्षणेऽपि स्थितिः स्यात्। अथ प्रथमक्षणस्थितिव्यतिरि-

---

१ यथा हि-क्षणिकस्य घटादेः स्वकाले पटादिक्षणेन सह वस्त्वन्तरत्वान्न विरोधः। एवं द्वितीयक्षणभाविन्या स्थित्यापि सह प्रथमक्षणस्थितेर्न विरोधः, अन्यथाविरोधात्। ततश्च स्खलनाभावात् द्वितीयेऽपि क्षणे प्रथमक्षणभाक् वस्तु स्थितिमदनुपपद्यते। २. क्षणास्थिती ३. अनेकान्तवादापत्तिलक्षणः। ४. भावरूपा। ५. अन्यानन्यत्वप्रकारौ मुक्त्वा प्रकारान्तरेण यदि वर्तेत ६. प्रथमक्षणात्। ७. अनन्यत्वम्, तदोत्तरकालभाविपदार्थान्तरस्थितिक्षणेऽपि पूर्वकालभाविपदार्थक्षणस्थिति प्रसङ्गः; अथान्यत्वम्, तदेकतरा बाधेन। ८. अन्यानन्यत्वकल्पनायोगेन।

क्ताद्वितीयादिक्षणास्थितिः परिकल्पिता, इति प्रथमक्षणस्थि रेवं। तर्हि द्वितीयादिक्षणास्थितिरित्यत्र चोक्तो दोषः। क्षणस्थितिधर्मकं वस्त्वेव द्वितीयादिक्षणास्थितिः, इति न, धायोगात्; तथाहि-" क्षणस्थितिधर्मकं क्षणस्थितिस्वभाव च्यते " इत्यादि तदेवावर्तते, इति। अथोच्येत-द्वितीयादि णास्थितौ सत्यां प्रथमक्षणस्थितेरभावात्, भावे वा तस्त्रु पत्तेः, प्रतियोग्यभावादन्यानन्यत्वकल्पनाऽसम्भवतस्तदु दोषाभावः; तथाहि-द्वितीयादिक्षणे तदेव न भवति। मिति अपि तस्यैवास्थितत्वात् स्थितिवत् तदनवस्थितत्वेऽसंत सङ्गः, अतदंशत्वे च तदा स्थित्यापत्तिः; तथाहि- द्वि यक्षणे तस्यैव स्थितिरिति, ततश्च 'स्वहेतुभ्य एव स्थित पास्थितिधर्मकः समुत्पद्यते' इति प्रतिपत्तव्यम्। न चास्मिन्प कारणात् क्रमवद्धर्माध्यासितकार्योत्पत्तिर्युज्यते, इति। अ

१ द्वितीया [illegible] प्रथमक्षणस्थि... वशानेव परिकल्पि [illegible] प्रथमक्षण च इति [illegible] दोषाभा [illegible] न पदार्थ। ३ [illegible]। ४ [illegible] वस्तुन्यभावस्य [illegible] द्वि [illegible], तदा प्रथम [illegible] तथा द्वितीयादिक्षणस्थित्यनु [illegible] पदार्थस्य सम्बन्धिनौ भावौ द्विती [illegible] इति कृत्वा तत्र परस्परेऽपि प्रतियोगिनी [illegible]। ६ अन्यक्षणेऽनुस्थि [illegible] १० [illegible] ११ स्थिततौ। १२ वस्तु। १३ वस्तु। १४ [illegible] १५ [illegible] वस्तुन [illegible]। १६ [illegible]

यद्येव स्थितिस्तदैवास्थितिः स्यात्, कुतः क्षणस्थितिधर्मकत्वम् इति। सत्यां वा स्थितौ, क्षणस्थायित्वे तयोः स्थित्या विरोधात्, प्रथमक्षणवत् सदा स्थितिप्रसङ्गः। न च 'निरंशतांशभावेभ्यो हेतुभ्यस्तत्स्वभावमेवोत्पद्यते,' इत्युच्यमानं किञ्च गजनसमवाये राजते, युक्तिवैकल्याद्, उभयत्र कारणे कार्ये च स्वभावान्तरकल्पनायां अपि तादवस्थ्यात्।

स्यादेतद्, अन्यथा स्वभावान्तरकल्पना, अर्थक्रियाऽभावप्रसङ्गात्, इति।

एतदप्यसङ्गतम्, क्षणस्थितिधर्मक एव वस्तुतत्त्व-दनावप्रसङ्गात्; तथाहि—यथोक्तस्वभाव वस्त्वेवार्थक्रिया, यथोक्तम्—'भूतिर्येषां क्रिया सैव' इत्यादि,—तच्च न घटामटति, इति निदर्शितमेतद्, अलं विस्तरेणेति।

---

१. इत्युक्तं भवति, यदि स्थितं द्वितीये तदा न भवति इति कोऽर्थः? [illegible] 'यदैव स्थितिस्तदैवास्थितिः' इति, क्षणमात्रमपि वस्तुन स्थितौ स्यात्। अयं भावः—यदा 'क्षण [illegible] [illegible], तदा [illegible], क्षणस्थायित्व [illegible] [illegible],' इति 'यदैव स्थिति तदैवा [illegible]' इति [illegible], [illegible] एवं [illegible] [illegible], एवं [illegible] [illegible] [illegible] [illegible]। २ प्रथमक्षणभाविन्या। ३. [illegible]। ४ [illegible] [illegible]। ५. [illegible] [illegible] [illegible]' इत्यादौ। ६ [illegible]। ७ [illegible] [illegible] [illegible] [illegible]। ८. [illegible]। ९. [illegible]। १०. [illegible] [illegible] [illegible]।

८ क्षणिकाः सर्वसंस्कारा अस्थिराणां कुतः क्रिया।
भूतिर्येषां क्रिया सैव कारकं सैव चोच्यते॥ १॥

किं च—अत्रापि ‘धर्मधर्मिणोर्नानात्वम्’ ? अनानात्वं च ?’ इति वाच्यम् । यद्यनानात्वम्, किं सर्वथा ? [illegible] कथंचिद् ? यदि सर्वथा, ततः स्थित्यस्थित्योरेकत्वम्, एक[illegible]स्माद् धर्मिणोऽनानात्वात्, तत्स्वरूपवद् । एवं च स्थिति[illegible]प्रसङ्गोऽस्थितिप्रसङ्गो वा; धर्मिणो वाऽभेदः, स्थित्यस्थित्यो[illegible] नानात्वात्, तत्स्वात्मवदेव, तथा च-अन्यतरेव स्थितिम[illegible] अन्यच्च तच्छून्यम्, इति कुतः क्षणस्थितिधर्मकत्वम् ? अथ कथंचिद्, अभ्युपगमविरोधः । अथ नानात्वम्, तदपि सर्वथा ? कथंचिद्वा ? इति; यदि सर्वथा, हन्त ! त[illegible] स्थित्यस्थितिरूपभावशून्यत्वान्निःस्वभावत्वात् कुतोऽस्य वस्तुस्थितिः ? । अथ कथंचिद्, अत्रोक्तो दोषः ॥

स्यादेतत्, परिकल्पितो धर्मधर्मिभावः, न पुनर्वास्त[illegible] इति; एवमपि धर्मधर्मिणोः परिकल्पितत्वाच्छून्यताप्रस[illegible] तदेवमपि कुतः क्षणस्थितिधर्मकत्वम् ? इति ।

